## लिटि वयो यः। (३८/२४१३)

न सम्प्रसारणम् इति अनुवर्तते। लिटि परतो वयो यकारस्य सम्प्रसारणं न भवति। [1]उवाय, ऊयतुः, ऊयुः। लिड्ग्रहणमुत्तरार्थम्॥

## वश्चास्यान्यतरस्यां किति। (३९/२४१४)

[2]अस्य वयो यकारस्य किति लिटि परतो वकारादेशो भवति अन्यतरस्याम्। ऊवतुः, ऊवुः। ऊयतुः, ऊयुः[3]। किति इति किम्? उवाय। उवयिथ॥

## वेञः। (४०/२४१६)

लिटि इत्यनुवर्तते। 'वेञ् तन्तुसन्ताने' (धा. पा. १००७) इत्यस्य धातोः लिटि परतः सम्प्रसारणं न भवति। ववौ, ववतुः, ववुः। किति यजादित्वात् धातोः प्राप्तम् अकित्यपि 'लिट्यभ्यासस्योभयेषाम्' (६. १. १७/२४०८) इत्यभ्यासस्य, अतः उभयं प्रतिषिध्यते॥

## ल्यपि च। (४१/३३३९)

वेञः इत्यनुवर्तते। ल्यपि च परतो वेञः सम्प्रसारणं न भवति। प्रवाय। उपवाय। [4]पृथग्योग-करणमुत्तरार्थम्॥

## ज्यश्च। (४२/३३४०)

ल्यपि [5]इत्येव। 'ज्या वयोहानौ' (धा. पा. १५००) इत्यस्य धातोः ल्यपि परतः सम्प्रसारणं न भवति। प्रज्याय। उपज्याय॥

## व्यश्च। (४३/३३४१)

ल्यपि इत्येव। 'व्येञ् संवरणे' (धा. पा. १००८) इत्येतस्य धातोः ल्यपि परतः सम्प्रसारणं न भवति। प्रव्याय। उपव्याय। योगविभागः उत्तरार्थः॥

## विभाषा परेः। (४४/३३४२)

ल्यपि च व्यश्च इति अनुवर्तते। परेरुत्तरस्य व्येञ् इत्येतस्य धातोः ल्यपि परतः विभाषा सम्प्रसारणं न भवति। परिवीय यूपम्, [6]परिव्याय। सम्प्रसारणे कृते परपूर्वत्वे च ह्रस्वस्य (६. १. ७१/२८५८) इति तुक् प्राप्नोति, स 'हलः' (६. ४. २/२५६९) इति दीर्घत्वेन परत्वाद् बाध्यते॥

---

1. उवाय नास्ति क. फ. 2. लिटि इति वर्तते इत्यधिकम् ड. 3. इति इत्यधिकम् फ. 4. वाक्यमिदं नास्ति क. फ. ह. 5. इत्यनुवर्तते ह, इति वर्तते क. 6. परिविव्याय यूपम् क.